दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् श्रावणकृष्णसप्तमी
श्रावण 20 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-6 ■ वर्ष-5 ■ अङ्क-286 | 1 | अगस्त 05, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 हिमाचलप्रदेशस्य सर्वेषु विद्यालयेषु सितम्बरमासस्य प्रथम-दिनाङ्कात् 'ऑनलाइन' माध्यमेन भविष्यति उपस्थितिः, 'पञ्जिका' व्यवस्था समाप्ता

3 मणिमहेश- यात्रायै 'ऑनलाइन' पञ्जीकरणम् ५ अगस्त-दिनाङ्कात्, प्रतिदिवसं ५,००० भक्तजनाः प्राप्स्यन्ति अनुमतिम्

5 चिन्तनम् भारतस्य-शिक्षा-प्रणाल्याः यथार्थम्

## झारखण्डे छात्राणां विरोधः एकादशदिनं यावत् अन्ववर्तत्



झारखण्डे झारखण्डलोकसेवायोगस्य झारखण्डकर्मचारीचयनायोगस्य च परीक्षासु कथित-अनियमितता-कारणात् सी.बी.आई. अन्वेषणार्थं राञ्चीनगरे छात्राणां विरोधः एकादशदिनं यावत् अन्ववर्तत। आन्दोलनकारिणः अस्मिन् मासे सप्तमदिनाङ्के झारखण्डविधानसभां यावत् याचनानां समर्थनार्थम् आन्दोलनं करिष्यन्ति । अत्रान्तरे भाजपादलस्य सदस्यः निशिकान्तदुबे इत्येषः नियुक्तिप्रक्रियायां भ्रष्टाचारं स्वजनपक्षपातं च आरोपयन् सी.बी.आई.-अन्वेषणस्य याचनां कृतवान्। मुख्यमन्त्री हेमन्तसोरेनः उच्चतान्त्रिकशिक्षामन्त्रिणः सुदिव्यकुमारस्य नेतृत्वे उच्चस्तरीयसमितिं निर्मितवान्, या छात्रैः सह संवादं करिष्यति। अपि च सः समितिम् मासत्रये स्वप्रतिवेदनं समर्पयितुम् आदिष्टवान्।

## होर्मुज-जलमार्गे वस्तुवाहक पोते आक्रमेण ऊर्जा सङ्कटः वर्धितः

होर्मुज-जलमार्गे वस्तुवाहक पोते आक्रमेण ऊर्जा सङ्कटः वर्धितः, अमेरिका-ईरानयोः शान्ति-वार्तासु अनिश्चिततायाः स्थितिः वर्तते। अयं पोतः होरमुज-जलमार्गे आसीत्, तदैव केनचित् अज्ञात प्रक्षेप्रास्त्रेण आक्रान्तः अभवत्। ब्रिटेन-देशस्य 'यूके-एमटीओ' संस्थया निवेदितं यत् ओमान देशस्य 'अल-खसब' इति स्थानस्य उत्तर-पूर्व-दिशि विंशतिः समुद्री मील दूरे आक्रान्तः पोतः आपत्-सङ्केतं अजनयत्। एषा घटना तयोः उभयोः देशयोः मध्यस्थता वार्तायाः विषयमधिकृत्य विरोधाभासि-कथनानन्तरं सम्भूता।

# संसदवार्ता-: संसदि 'जन्म-मरण-पञ्जीकरणसंशोधनविधेयम् पारितम्



संसदि जन्म-मृत्युपञ्जीकरणसम्बद्धः उपयुक्तः विधेयकः षड्विंशत्यधिक-द्विसहस्रतमः पारितः। राज्यसभयापि अस्य विधेयकस्य अनुमोदनं कृतम् । लोकसभया एतत् विधेयकं पूर्वमेव पारितम्। गृह राज्यमन्त्री नित्यानन्दरायः उच्चसदने एतं विधेयकम् उपस्थापितवान्। विधेयकस्य अनुमोदनानन्तरं राज्यसभा आदिनाय स्थगिता। इतः पूर्व यदा मध्याह्ने द्वादशवादने प्रथम-स्थगनानन्तरं राज्यसभा पुनः समवेता, तदा सभापतिः सी.पी. राधाकृष्णन् इत्यसौ विपक्ष-सदस्यानाम् कोलाहलस्य मध्ये एव प्रश्नकालं प्रारब्धवान्। अनेकैः सदस्यैः पृष्टानां प्रश्नानां मन्त्रिभिः उत्तराणि प्रदत्तानि । विपक्षिणां विरोधोद्घोषेषु सभापतिना कार्याचरणं द्विवादनं यावत् स्थगितम्। उच्चसदनस्य उपवेशनावधौ विपक्षनेता मल्लिकार्जुन खड़गे अयोध्या राममन्दिरात् दान-चौर्यस्य विषयम् उत्थापितवान्। संसदीय कार्यमन्त्री किरेन रिजिजुः प्रावोचत् यत् अयोध्यायां राम-मन्दिरस्य विरोधं कुर्वन्तौ कांग्रेस-समाजवादी-पक्षौ अद्य दानचौर्यस्य मिथ्यारोपैः जनसामान्यं भ्रामयितुं प्रयतेते। रिजिजुः अकथयत् यत् एतत् सदनं सर्वेषामस्ति, कांग्रेस-दलम् च उिद्गहस्य समयस्य दुरुयोगं करोति।

### लोकसभया विनियोगविषयकः विधेयकः षड्विंशत्यधिकद्विसहस्रतमः पारितः

अपरतश्च, लोकसभया विनियोगविषयकः विधेयकः षड्विंशत्यधिकद्विसहस्रतमः पारितः। विधेयकस्य अनुमोदनानन्तरं लोकसभा आदिनाय स्थगिता । अत्रावसरे वित्तमन्त्री निर्मला सीतारामन् इत्येषा कराधान-अन्य-विधि-विधेयकम् षड्विंशत्यधिक-द्विसहस्रतमं सदने प्रास्तवीत् । नीट्-प्रश्नपत्र-गोप्यताभङ्ग-प्रकरणमधिकृत्य अन्येषु प्रकरणेषु च विपक्षिणां सततावरोधेन लोकसभायाः कार्याचरणं बाधितमभवत् ।

## संसद - 'मङ्गल-मिलन'

संसदि एनडीए-दलस्य 'मङ्गल-मिलन' रणनीतिक उपवेशनं सम्पन्नम्, प्रधानमन्त्रिणा मोदिना सह शीर्ष नेतारः नव-गठित-एनसीपीआई-दलस्य सांसदाः च उपस्थिताः आसन्। संसदि मङ्गल-मिलन-प्रसङ्ग राष्ट्रिय-लोकतान्त्रिक-सङ्घस्य मन्त्रणा-सभा सञ्जाता; यत्र प्रधानमन्त्रिणा सह अन्ये गणमान्य सांसदाः च मन्त्रणाम् अकुर्वन्।

### 'राष्ट्रीयखाद्यसुरक्षा संशोधनम् विधेयकम्, २०२३ वर्षस्य प्रारूपविषये राज्यसर्वकारेभ्यः टिप्पण्यः परामर्शश्च अपेक्षिताः-प्रहलादजोशी



उपभोक्तृकार्य-खाद्य-सार्वजनिकवितरणमन्त्री प्रहलादजोशी अवदत् यत् 'राष्ट्रीयखाद्यसुरक्षा-संशोधन विधेयकम्, त्रयविंशत्यधिक-द्विसहस्त्रवर्षस्य अन्तर्गतं कस्यापि राज्यस्य अथवा हितग्राहिणां कृते प्रदीयमानेषु अन्नधान्येषु किमपि न्यूनीकरणं न भविष्यति। राज्यसभायां प्रश्नोत्तरकाले अनुपूरकप्रश्नानाम् उत्तरं दत्त्वा श्रीजोशी अवदत् यत् 'राष्ट्रीयखाद्यसुरक्षा संशोधनम् विधेयकम्, त्रयविंशत्यधिक-द्विसहस्त्र' वर्षस्य प्रारूपविषये राज्यसर्वकारेभ्यः टिप्पण्यः परामर्शश्च अपेक्षिताः सन्ति ।

# सुभाषितम्

**इक्षोरग्रात्क्रमशः पर्वणि, पर्वणि यथा रसविशेषः।**
**तद्वत्सज्जनमैत्री, विपरीतानां च विपरीता॥**

भावार्थः- जिस प्रकार गन्ने में उसके सिरे से क्रमशः उसके मूल की ओर बढ़ते हुए विभिन्न गांठो में रस की मात्रा और मिठास बढ़ती जाती है उसी प्रकार सज्जन व्यक्ति भी अपने विरोधी व्यक्तियों से इसी प्रकार का व्यवहार करते हैं अर्थात् बाद में विरोध कम या समाप्त होने पर उसी प्रकार उनकी मित्रता भी और प्रगाढ़ तथा सुखद हो जाती है।




सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## पाक-अधिकृत-जम्मू-कश्मीर-क्षेत्रस्य बाग-जनपदे गोलिका प्रहारेण अशान्तिः

पाकिस्तानाधिकृतजम्मूकश्मीरे अशान्तिः तीव्रा अभवत्, यतः पाकिस्तानी सैन्यबलैः बागमण्डले निश्शस्त्र-नागरिकाणाम् उपरि गोलिकाप्रहारः कृतः। जॉइंट अवामी एक्शन कमिटी इत्यनेन समूहेन प्रोक्तं यत् पाकिस्तानीसैन्यबलं निश्शस्त्र-नागरिकाणाम् उपरि अश्रु-गैस इत्यस्य प्रहारं अकरोत्। जॉइंट अवामी एक्शन कमिटी इत्यनेन घटनायाः चलच्चित्रं सामाजिक सञ्चारपटले प्रसारितम् । एताः घटनाः पी.ओ.जे. के. इत्यत्र प्रदर्शनकारिणां विरुद्ध पाकिस्तानी-सेनायाः वर्धमानक्रौर्यस्य मध्ये अभवन्, अनेन पञ्चाशदधिकाः जनाः मृत्युमुपगताः ।

# हिमाचलप्रदेशस्य सर्वेषु विद्यालयेषु सितम्बरमासस्य प्रथम-दिनाङ्कात् 'ऑनलाइन' माध्यमेन भविष्यति उपस्थितिः, 'पञ्जिका' व्यवस्था समाप्ता




## शिक्षा-मन्त्रिणः अध्यक्षतायाम् आयोजितायां विभागीय-समीक्षागोष्ठ्यां निर्णयः, सम्पूर्णहिमाचले 'विद्या-समीक्षा-केन्द्र' माध्यमेन पञ्जीकृता भविष्यति उपस्थितिः निरीक्षणञ्च

**हिमसंस्कृतवार्ता-शिमला**
हिमाचलप्रदेशस्य सर्वकारीय-विद्यालयेषु सितम्बरमासस्य प्रथमदिनाङ्कात् (१ सितम्बर २०२६) पूर्णतः अङ्कीया उपस्थिति-व्यवस्था प्रवर्तिता भविष्यति। अस्य परं शिक्षकाणां छात्राणां च उपस्थितिः 'पञ्जिकायां न, अपि तु 'विद्या- समीक्षा- केन्द्रस्य' माध्यमेन 'ऑनलाइन' रूपेण पञ्जीकृता भविष्यति। न केवलमेतत्, विद्यालयानां निरीक्षणस्य प्रक्रिया अपि अधुना अङ्कीय-मञ्चात् सञ्चालिता भविष्यति। एषः महत्त्वपूर्णः निर्णयः सोमवासरे शिक्षामन्त्रिणः रोहितठाकुरस्य अध्यक्षतायां शिक्षानिदेशालये आयोजितायां विभागीय- समीक्षा-गोष्ठ्यां गृहीतः। शिक्षामन्त्रिणा अधिकारिणः निर्दिष्टाः यत् एकस्य सप्ताहस्य अभ्यन्तरे 'विद्या-समीक्षा-केन्द्र'-दलम् 'ऑनलाइन' उपस्थितिप्रणाल्याः पूर्णं प्रारूपं रचयतु अस्य च परं सर्वेभ्यः मण्डल-उपनिदेशकेभ्यः प्रशिक्षणं दीयेत, येन सितम्बरमासस्य प्रथम- दिनाङ्कात् व्यवस्था सम्पूर्णप्रदेशे प्रभावकारि-रूपेण प्रवर्तिता भवितुं शक्येत्। तेन उक्तं यत् अङ्कीयनिरीक्षणेन विद्यालयेषु पारदर्शिता वर्धिष्यते शिक्षाव्यवस्था च अधिका उत्तरदायित्वयुक्ता भविष्यति।

शिक्षामन्त्रिणा एतदपि घोषितं यत् सर्वकारीय-विद्यालयेभ्यः नीट, जे.ई.ई. मेन्स, जे.ई.ई. एडवांस चेति सदृशीषु राष्ट्रिय-प्रतिस्पर्धा-परीक्षासु सफलान् छात्रान् प्रदेशसर्वकारः सम्मानितं करिष्यति। गोष्ठ्यां ज्ञापितं यत् राष्ट्रियस्तरे आयोजिते 'स्वच्छ एवं हरित विद्यालय' अभियाने हिमाचलस्य ११ विद्यालयानां चयनं जातम्। चयनित-प्रत्येक-विद्यालयाय एकलक्ष- रूप्यकाणां प्रोत्साहन-राशिः लप्स्यते सम्बद्धः प्रधानाचार्यश्च 'एक्सपोजर-विजिट'-प्रवासे प्रेषयिष्यते। शिक्षामन्त्रिणा एतत् प्रदेशस्य शिक्षा-व्यवस्थायाः कृते राष्ट्रियस्तरे महती उपलब्धिः प्रोक्ता। शिक्षाविभागेन 'शिव-नाडर-फाउंडेशन'-संस्थया सह 'एम.ओ.यू.' हस्ताक्षरेण आर्थिकरूपेण दुर्बल- परिवाराणां प्रतिभाशालीभ्यः छात्रेभ्यः आवासीयशिक्षायाः मार्गः उद्घाटितः। पञ्चमकक्षायाः छात्राणां परीक्षायाः आधारेण चयनं भविष्यति षष्ठ्याः द्वादशीकक्षां यावत् सम्पूर्ण-शिक्षणस्य व्ययं 'फाउंडेशन' संस्था वहिष्यति। आवेदनस्य अन्तिमा तिथिः ३१ अगस्तदिनाङ्कः परीक्षा च २० सितम्बरदिनाङ्के भविष्यति। विभागेन प्रत्येकमण्डले संयुक्तनिदेशकस्य एकस्य नूतन-पदस्य सृजनस्य प्रस्तावः अपि रचितः अस्ति। अनेन उपनिदेशकेभ्यः पदोन्नतेः अवसराः लप्स्यन्ते मण्डलस्तरे शिक्षा-प्रशासनं च इतोऽपि सुदृढं करिष्यते।

### शिक्षक-पुरस्काराणां चयने परिवर्तनम्-

राज्य-शिक्षक-पुरस्काराय अस्मिन् क्रमे चयन- प्रक्रियायां बहूनि परिवर्तनानि कृतानि सन्ति। अधुना विद्यालयः अपि स्वयं आवेदनं कर्तुं शक्ष्यति, यदा च डी.सी., एस.डी.एम., उपनिदेशकः विद्यालय- प्रबन्धन- समितयश्च नामाङ्कनं प्रेषयितुं शक्ष्यन्ति। अस्मिन् वारे जनजातीय-क्षेत्रेषु सेवायाः अतिरिक्ताः अङ्काः समापिताः सन्ति तथा च नवाचाराय, शिक्षण-परिणामेभ्यः छात्राणां जीवने च वास्तविक- परिवर्तनाय प्राथमिकता दास्यते। आवेदनं कुर्वतां शिक्षकाणां निरीक्षणं अधुना मण्डलस्तरे न, अपि तु शिक्षा- निदेशालय- स्तरस्य समितिः करिष्यति। छात्रेभ्यः शिक्षकाणां विषये 'ऑनलाइन'-प्रतिक्रिया अपि गृहीष्यते।

### अस्थायी-शिक्षकाणां नियुक्तये नीतिः

शिक्षाविभागस्य समीक्षागोष्ठ्याम् जम्मूकश्मीर- प्रारूपस्य आधारेण हिमाचलस्य दुर्घटक्षेत्रेषु अस्थायी- शिक्षकाणां नियुक्तेः प्रस्तावस्य रचनस्य अपि निर्णयः गृहीतः। 'समग्र-शिक्षा- अभियानम्' इत्यस्य अन्तर्गतं एकस्य वर्षस्य कृते नियुक्तयः करिष्यन्ते प्रतिवर्षं च नूतन-योग्यता-सूच्याः आधारेण चयनं भविष्यति। चयनप्रक्रियायां शैक्षणिकयोग्यतायै, अनुभवाय उच्चशिक्षायै च भारः दास्यते। चयनितशिक्षकैः २५ सहस्ररूप्यकाणि प्रतिमासं मानदेयं दातुं प्रस्तावं रचयित्वा मन्त्रिमण्डलस्य सम्मुखं स्थापयिष्यते। एतदपि सम्मुखम् आगतं यत् प्रदेशस्य १२४ 'पीएमश्री' विद्यालयेषु अङ्कीयग्रन्थागारस्य उपयोगः निरन्तरं वर्धमानः अस्ति।

## शिमलायाः विश्वेशनेगी ईरानदेशे भारतस्य राजदूतः संजातः, बी.सी.एस. क्षेत्रे हर्षातिरेकस्य वातावरणम्

**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशस्य राजधान्याः शिमलायाः 'बिशप- कॉटन- स्कूल' इत्यस्य पूर्वतनः छात्रः विश्वेशनेगी महोदयः केन्द्रसर्वकारेण 'इस्लामिक- रिपब्लिक- ऑफ- ईरान' देशे भारतस्य राजदूतः नियुक्तः अस्ति। अस्याम् उपलब्धौ विद्यालये हर्षातिरेकस्य वातावरणम् अस्ति। विद्यालय-प्रबन्धनस्य अनुसारं विश्वेशनेगीमहोदयः १९९४ तमस्य वर्षस्य गणस्य छात्रः आसीत्। सः २००२ तमस्य वर्षस्य गणस्य भारतीय- विदेश- सेवा- अधिकारी अस्ति। विद्यालय-प्रबन्धनस्य अनुसारं संस्थायाः कृते एतद् गौरवस्य क्षणम् अस्ति। प्रधानाचार्यः मैथ्यू-पी. जॉन महोदयः, शिक्षकाः, छात्राः, पूर्वतनाः छात्राश्च विश्वेशनेगी- महोदयाय वर्धापनानि यच्छन्तः तस्मै सफल- कार्यकालस्य मङ्गलकामनाः प्रेषितवन्तः।



## ओडिशा-राज्ये प्रमुख नदीनां आप्लवन-ह्रासेन आपद्-स्थितिः शमम् उपैति



ओडिशा-प्रदेशे महानद्याः जलस्तरस्य ह्रासेन सह जलप्लावन-स्थितिः शमम् उपैति । यद्यपि जलमग्न-क्षेत्रेषु अद्यापि सहस्रशः जनाः जलावरोधस्य कष्टं अनुभवन्ति, तथापि सर्वकारस्य आपत् रक्षक-बलैः भोजन-चिकित्सा-सेवानां आपूर्तिः सुष्ठु क्रियते। आशास्यते यत् आगामि-दिवसेषु स्थितिः पूर्णतया सामान्य-रूपं धरिष्यति। अपरत्र, केरल-राज्यस्य अष्टसु जनपदेषु अतिवृष्टिपरा 'रक्त- वर्णीया संचेतना घोषिता। भारतीय-ऋतु विज्ञान-विभागेन असम, मेघालय, उप-हिमालयी-पश्चिम-वङ्गाल, सिक्किम-राज्येषु च अतिवृष्टिपरा 'रक्त-संचेतना' प्रख्यापिता। एतदतिरिच्य, अद्य यावत् हरियाणा, चण्डीगढ, देहली, पञ्जाब, हिमाचलप्रदेश, जम्मू-कश्मीर, लद्दाख, मध्य-महाराष्ट्र, ओडिशा, उत्तरप्रदेश तथा उत्तराखण्ड राज्येषु अतिवृष्टिः सम्भाव्यते ।

## कोरियामास्टर्सबैडमिंटन इति प्रतियोगितायाः शुभारम्भः, भारतेन पुरुषयुगलस्य प्रथमा स्पर्धा विजिता




बैडमिण्टन-क्रीडायां भारतीयक्रीडकैः गतदिने दक्षिणकोरियादेशस्य आसन-नगरे बी.डब्ल्यू.एफ.-सुपर-त्रिशतं कोरिया-मास्टर्स इति प्रतियोगितायां स्वीयस्य अभियानस्य शुभारम्भः कृतः। पुरुषयुगलस्पर्धायां कृष्णप्रसाद-गरागा, पृथ्वीकृष्णमूर्तिराय-इत्येतयोः युगलं प्रारम्भिकचक्रे थाईदेशीययुगलं पराजित्य द्वितीयचक्रे प्रवेशम् अकरोत् । पुरुषैकलस्पर्धायाः प्रवेशचक्रे तुषारसुवीरः जापानदेशीयेन शोगो-ओगावा-इत्यनेन एकविंशति-दश, एकविंशति-सप्तदश इत्यङ्कैः पराजितः। महिलायुगलस्पर्धायां श्रुतिमिश्रा-प्रियाकोङ्गबाम-इत्येतयोः युगलं जापानदेशीययुगलेन रिरीना-हिरामोतो-कोकोना-इशिकावा-इत्येताभ्यां पराजितं भूत्वा प्रतियोगितायाः बहिः अभवत् ।

# MANIMAHESH YATRA 2026- मणिमहेश- यात्रायै 'ऑनलाइन' पञ्जीकरणम् ५ अगस्त-दिनाङ्कात्,

## प्रतिदिवसं ५,००० भक्तजनाः प्राप्स्यन्ति अनुमतिम्



**हिमसंस्कृतवार्ताः- चम्बा।**

पवित्र-मणिमहेशयात्रायै 'ऑनलाइन' पञ्जीकरणं ५ अगस्तदिनाङ्कात् प्रारभ्यते। भक्तजनाः यात्रायाः कृते स्वपञ्जीकरणम् आधिकारिक-जालपुटम् https://manimaheshyatra.hp.gov.in इत्यस्य माध्यमेन कर्तुम् शक्ष्यन्ति। प्रथम-चरणे २५, २६ तथा च २७ अगस्त-दिनाङ्कस्य यात्रायै 'ऑनलाइन' पञ्जीकरणम् उपलब्धं कारयिष्यते। प्रतिदिवसमधिकतमं ५,००० भक्तजनेभ्यः एव यात्रायाः अनुमतिः प्रदास्यते। सर्वे 'स्लॉट' स्थानानि 'प्रथमम् आगच्छतु प्रथमं प्राप्नोतु' इत्यस्य आधारेण आवण्टितानि भविष्यन्ति। भरमौर-प्रशासनेन स्पष्टीकृतं यत् पञ्जीकरणम् विना कस्मै अपि भक्तजनाय यात्रामार्गे प्रवेशस्य अनुमतिः न दास्यते। अतः भक्तजनानाम् कृते आग्रहः कृतः यत् पञ्जीकरणस्य प्रारम्भः भवत्येव शीघ्रम् स्वकीयम् 'स्लॉट' स्थानम् सुरक्षितम् कुर्वन्तु।

भक्तजनानाम् कृते परामर्शः दत्तः यत् ते पञ्जीकरण-प्रारम्भात् पूर्वम् सर्वान् आवश्यकान् अभिलेखान् सज्जीकृत्य स्थापयन्तु, येन 'ऑनलाइन' प्रक्रियाकाले कस्यापि प्रकारस्य असुविधायाः सम्मुखीकरणं न करणीयं भवेत्। नवीनतमायै प्रामाणिकायै च सूचनायै नियमेन वेबसाइट-अवलोकनम् कुर्वन्तु। प्रशासनेन सर्वेभ्यः भक्तजनेभ्यः प्रार्थना कृता यत् ते यात्रा-काले प्रसारितानाम् सर्वेषाम् दिशा-निर्देशानाम् पालनम् कुर्वन्तु, केवलम् आधिकारिक-स्रोतोभ्यः प्राप्तासु सूचनासु एव विश्वासम् कुर्वन्तु। ए.डी.एम. विकासशर्मा ज्ञापितवान् यत् भक्तजनानाम् कृते सुरक्षिताम्, सुगमाम् दिव्याम् च अनुभूतिम् रचयितुम् सर्वाः आवश्यकाः व्यवस्थाः निश्चिताः कर्तुम् निरन्तरम् कार्यम् क्रियमाणम् अस्ति।

## 'जालपुटे' लप्स्यते भरमौरस्य सटीकम् ऋतु- पूर्वानुमानम्

मणिमहेश-यात्रायाम् देशविदेशेभ्यः आगच्छताम् भक्तजनानाम् सुरक्षायाः सुविधायाः च उद्देशेन भारतीय- ऋतु-विज्ञान-विभागेन भरमौर-क्षेत्राय विशेषम् ऋतु-पूर्वानुमानम् उपलब्धम् कारितम्। आई.एम.डी. संस्थया विशेष- ऋतु- पूर्वानुमान- सम्पर्कः मणिमहेशयात्रायाः आधिकारिक- पुटके https://manimaheshyatra.hp.gov.in इत्यत्र उपलब्धः कारितः। अनेन भक्तजनाः यात्रा-पञ्जीकरणात् यात्रा-प्रारम्भात् च पूर्वम् भरमौर-क्षेत्रस्य ऋतोः नवीनतमां सूचनाम् प्राप्य स्वकीयायाः यात्रायाः श्रेष्ठयोजनां रचयितुं शक्ष्यन्ति। भक्तजनेभ्यः भरमौरक्षेत्रस्य ऋतु- सम्बन्धिनी सूचना समये प्राप्स्यते, येन ते ऋतु- परिस्थितीनाम् अनुरूपं सुरक्षितां व्यवस्थिताम् च यात्राम् कर्तुम् शक्ष्यन्ति। प्रशासनेन भक्तजनेभ्यः प्रार्थना कृता यत् यात्रा-प्रारम्भात् पूर्वम् ऋतोः सूचनाम् अवश्यमेव प्राप्नुवन्तु।

# २० वर्षेभ्यः परम् प्राप्ता सफलता, डलहौजी- वनक्षेत्रे द्वयोः दशकयोः अनन्तरम् दृष्टः दुर्लभः 'अज मृगः'




**हिमसंस्कृतवार्ताः- चम्बा।**

चम्बा-मण्डलस्य डलहौजी-वनक्षेत्रेषु प्रायः द्वयोः दशकयोः अनन्तरम् दुर्लभस्य अजमृगस्य ('हिमालयन- सीरो) उपस्थितिः पञ्जीकृता अस्ति। कालाटोप- खज्जियार- वन्यजीव- अभयारण्यात् सम्बद्धे डलहौजी-जलागम-क्षेत्रे एषः दुर्लभः वन्यजीवः प्रथमतया 'कैमरा'-यन्त्रे अभिलेखितः अस्ति। अतः मन्यते यत् क्षेत्रस्य प्राकृतिक-आवासः अधुना अपि अस्याः दुर्लभ-प्रजात्याः कृते सुरक्षितः अनुकूलश्च अस्ति। यत्किञ्चित् 'हिमालयी- सीरो' प्राणी 'कैमरा' यन्त्रे आबद्धं जातम्, एतत् वनविभागः एकां महतीम् उपलब्धिं मन्यते। सूचनानुसारं वनविभागेन वन्यजीव-निरीक्षणाय 'कैमरा' यन्त्राणि स्थापितानि सन्ति। एतेषु यन्त्रेषु 'हिमालयन सीरो' प्राणिनः चित्राणि गतिविधयश्च रिकॉर्ड- जातानि। गतेभ्यः प्रायः २० वर्षेभ्यः अस्मिन् क्षेत्रे अस्य दुर्लभजन्तोः कापि प्रामाणिकी उपस्थितिः पञ्जीकृता न अभवत्। तादृशे अस्य पुनः दर्शनं वन्यजीव-संरक्षणस्य दिशि महती सफलता मन्यते।

'हिमालयन सीरो' एकः लज्जाशीलः न्यून-दृश्यमानः च वन्य-खुरयुक्त-स्तनपायी प्राणी अस्ति, यः सामान्यतया घनेषु वनेषु, शैल-प्रवणेषु दुर्गेषु पर्वतीय-क्षेत्रेषु च वसति। अस्य सङ्ख्या परिमिता अस्ति, अतः अस्य गणना दुर्लभेषु वन्यजीवेषु भवति। विशेषाणां मन्यते यत् अस्याः प्रजात्याः प्रत्यावर्तनेन क्षेत्रस्य जैव-विविधतायाः वन-पारिस्थितिक-तन्त्रस्य च श्रेष्ठ-स्थितेः अपि सङ्केतः प्राप्यते। वन-विभागस्य कथनम् अस्ति यत् अस्याः दुर्लभप्रजात्याः उपस्थितिं दृष्ट्वा डलहौजी- जलागम-क्षेत्रे तत्समीपस्थेषु वनक्षेत्रेषु च निरीक्षणं संरक्षण-गतिविधयश्च इतोऽपि सुदृढाः करिष्यन्ते। साकमेव स्थानीयजनेभ्यः अपि प्रार्थना कृता अस्ति यत् वन्यजीवानां प्राकृतिक-आवासं सुरक्षितं स्थापयितुं सहयोगं कुर्वन्तु, येन तादृशाः दुर्लभाः प्रजातयः भविष्ये अपि सुरक्षिताः तिष्ठेयुः। 'कैमरा' यन्त्रे अस्य चित्रं गृहीतं जातम्, अनेन क्षेत्रस्य जैव-विविधतायै संरक्षण-प्रयासेभ्यः च नूतना शक्तिः प्राप्ता। 'हिमालयन-सीरो' भारतस्य हिमालयी- राज्येभ्यः अतिरिच्य नेपाल- भूटान- दक्षिण- पूर्व- एशिया- देशानां केषुचित् भागेषु प्राप्यते। कालाटोप- खज्जियार- वन्यजीव-अभयारण्यं पूर्वमेव कृष्ण-भल्लूकः, तरक्षुः (तेंदुआ), घोरलः, कस्तूरी-मृगः इति सहितानां बहूनां महत्त्वात्मकानां वन्यजीवानां निवासस्थानं मन्यते। अतः डलहौजी-जलागमक्षेत्रे 'सीरो' प्राणिनः नवीना रिकॉर्डिंगप्रक्रिया अस्य पारिस्थिति- महत्त्वम् इतोऽपि वर्धितवती। एषः दुर्लभः अभिलेखः न केवलं वन्यजीव-प्रेमिभ्यः, अपि तु सुरक्षा- संस्थाभ्यः अपि एकः सकारात्मकः सङ्केतः अस्ति।

## २० वर्षेभ्यः परं प्रत्यावर्तनम्

वन-बल-प्रमुखः डॉ. सञ्जयसूदः अवदत् यत् चम्बा-मण्डलस्य डलहौजी-वनक्षेत्रेषु द्वयोः दशकयोः अनन्तरम् अस्य वन्यजीवस्य प्रत्यावर्तनं हिमाचलप्रदेशस्य समृद्ध-जैव-विविधतायाः सफलानां संरक्षण-प्रयासानां च एकः उत्साहवर्धकः परिणामः अस्ति। डी.एफ.ओ. डॉ. कुलदीपसिंहजमवालः ज्ञापितवान् यत् 'हिमालयन- सेरो' प्राणिनः प्रथमम् दृश्य-माध्यमम् उपलब्धम् अभवत्।

# चलच्चित्रवार्ताः अजयदेवगणस्य दूरदर्शने पुनः भविष्यति प्रवेशः, प्रथमवारं करिष्यति अपराधप्रदर्शिन्याः सञ्चालनम्




**हिमसंस्कृतवार्ताः- जगदीश डाभी (मुम्बई)**

बॉलीवुड-चलच्चित्रजगतः बहवः महान्तः अभिनेतारः दूरदर्शनकार्यक्रमाणां सञ्चालनं कुर्वन्ति, येषु सलमानखान- अमिताभबच्चन- सदृशानां ताराणां नामानि समाविष्टानि सन्ति। सलमानखानः सुदीर्घकालात् 'बिग-बॉस' कार्यक्रमस्य सञ्चालनं करोति। अधुना बॉलीवुड-जगतः 'सिङ्घम्' अजयदेवगणः अपि दूरदर्शने सञ्चालकरूपेण दृश्यमानः भविष्यति। तथापि, तस्य कार्यक्रमे कोऽपि प्रतियोगी न भविष्यति, यतो हि सः कस्यापि 'रियलिटी-शो' कार्यक्रमस्य न, अपि तु एकस्य अपराध-प्रदर्शनस्य (क्राइम-शो- कार्यक्रमस्य) सञ्चालनं करिष्यति।

अजयदेवगणः अनेकभ्यः दशकेभ्यः चलच्चित्रेषु कार्यं करोति। तेन अद्यावधि बहूनि उत्तमानि चलच्चित्राणि दत्तानि। अधुना सः प्रथमवारं दूरदर्शने सञ्चालकस्य भूमिकायां दृश्यमानः भविष्यति। वृत्तान्तानुसारम्, अजयः एकस्य अपराधप्रदर्शनस्य (क्राइम-शो-कार्यक्रमस्य) सञ्चालनं करिष्यति, यस्मिन् अपराधसम्बद्धाः सत्याः घटनाः दर्शिताः भविष्यन्ति। एषः कार्यक्रमः 'सोनी- टीवी' वाहिन्याम् प्रसारितः भविष्यति। प्राप्तवार्तानुसारम्, अजयः अस्य कार्यक्रमस्य कृते स्वस्वीकृतिं दत्तवान् अस्ति अस्य छायाङ्कनं च शीघ्रमेव आरब्धं भवितुम् अर्हति।

# केन्द्रीयसंस्कृतविश्वविद्यालयस्य एकलव्यपरिसरस्य वेद-पौरोहित्य-कर्मकाण्ड-विद्याशाखायाः तत्त्वावधाने आयोजितः "गुरुपूर्णिमामहोत्सवः-२०२६"








**हिमसंस्कृतवार्ता, डॉ. आशीषमिश्रः।**
केन्द्रीयसंस्कृतविश्वविद्यालयस्य एकलव्यपरिसरस्य वेद-पौरोहित्य-कर्मकाण्ड-विद्याशाखायाः तत्त्वावधाने २९ जुलाई २०२६ दिनाङ्के "गुरुपूर्णिमामहोत्सवः-२०२६" अत्यन्तं भव्यतया, पारम्परिकरीत्या, गरिमामयवातावरणे च सम्पन्नः अभवत्। अस्य आयोजनस्य मुख्यम् उद्देश्यं भारतीयगुरुशिष्यपरम्परायाः आदर्शानां संरक्षणम्, महर्षिदेवव्यासस्य प्रति श्रद्धाञ्जलेः अर्पणम्, छात्रेषु च गुरुभक्तेः, अनुशासनस्य, भारतीयज्ञानपरम्परायाः प्रति आदरभावस्य च विकासः आसीत्। अस्मिन् कार्यक्रमे परिसरस्य निदेशकः, सह-निदेशकः, आचार्याः, अधिकारिणः, कर्मचारिणः तथा च विविधविभागानां छात्राः सोत्साहं सहभागितां कृतवन्तः।

## २. वैदिकपूजनम् अनुष्ठानं च

कार्यक्रमस्य प्रथमः सत्रः प्रातः १०:१५ वादनतः ११:०० वादनपर्यन्तं परिसरस्य मुख्यद्वारे स्थितस्य भगवान् श्रीजगन्नाथस्य प्रतिमायाः सम्मुखे वैदिकपरम्परायाः शास्त्रोक्तविधिविधानस्य च अनुसारम् आयोजितः।
अस्मिन् अवसरे सर्वप्रथमं सामान्यपूजनम्, तदनन्तरं महर्षिवेदव्यासपूजनं वैदिकहवनं च सम्पन्नम्। समग्रस्य अनुष्ठानस्य शास्त्रोक्तं सञ्चालनं वेद-पौरोहित्य-कर्मकाण्ड-विद्याशाखायाः आचार्यैः डॉ. आशीषमिश्र-डॉ. शिवसाधनदेवनाथ-डॉ. निशान्तमिश्रमहोदयैः निर्देशितम्। तदनन्तरं चतुर्वेदपारायणमाध्यमेन सकलविश्वस्य कल्याणाय, राष्ट्रस्य समृद्धये, मानवमात्रस्य मङ्गलाय च प्रार्थना कृता। वैदिकमन्त्राणां पावनोच्चारणेन यज्ञियाहुतिभिश्च सम्पूर्णः परिसरः आध्यात्मिकवातावरणेन आप्लवितः अभवत्। अस्मिन् वैदिकानुष्ठाने परिसरस्य निदेशकः प्रो. गुरुचरणसिंहनेगी, सह-निदेशकः प्रो. सुशान्तराजः, आचार्याः, अधिकारिणः, कर्मचारिणः, विविधविभागानां छात्राश्च श्रद्धया सहभागिनः भूत्वा आहुतिमर्पितवन्तः, गुरुभ्यश्च आशीर्वादान् गृहीतवन्तः।

## ३. उद्घाटनसमारोहः, गुरुपूजनम् सांस्कृतिककार्यक्रमाश्च

प्रथमसत्रस्य पूर्णाहुत्याः अनन्तरं पूर्वाह्ने ११:०० वादने एकलव्यपरिसरस्य बहुद्देशीयसभागारे कार्यक्रमस्य औपचारिकमुद्घाटनं सम्पन्नम्।
प्रथमं तावत् अध्यक्षैः, मुख्यअतिथिभिः, वरिष्ठाचार्यैश्च दीपप्रज्वलनं कृतम्। तत्पश्चात् सर्वैः उपस्थितजनैः सामूहिकरूपेण राष्ट्रगीतं विश्वविद्यालयस्य कुलगीतं च सस्वरं गीतम्। तदनन्तरं कुशलकोइराला-महोदयेन यजुर्वेदस्य तथा आलोकतिवारी-महोदयेन अथर्ववेदस्य मङ्गलमन्त्राणां वैदिकमङ्गलाचरणं प्रस्तुतम्। शास्त्रीकक्षायाः छात्रसमूहेन प्रस्तुतस्य मधुरात्मनः स्वागतगीतस्य अनन्तरं बौद्धदर्शनविद्याशाखा संयोजकः डॉ. उत्तमसिंहः स्वागतभाषणं कुर्वन् मुख्यअतिथीनां, अध्यक्षाणां, मञ्चासीनविदुषां सर्वेषां च समुपस्थितानां स्वागतमभिनन्दनं च अकरोत्। ततः परिसरस्य निदेशकैः वरिष्ठाचार्यैश्च मुख्यअतिथये प्रो. क्षिप्रा राय-महोदयायै अङ्गवस्त्रम्, पुष्पगुच्छं, स्मृतिचिह्नं च प्रदाय सम्माननं कृतं विशिष्टं गुरुपूजनं च सम्पादितम्। अनन्तरं छात्रैः मञ्चासीनानां गुरुजनानां श्रद्धया गुरुपूजनं कृतम्। पुनश्च शास्त्रीकक्षायाः छात्राभिः नबनीता-सौरूपा-रनीत-प्रभृतिभिः आदिगुरुशङ्कराचार्यविरचितस्य "गुर्वष्टकम्" इति स्तोत्रस्य भावपूर्णं सामूहिकपाठः कृतः। छात्रा प्रिया नाथः गुरुशिष्यपरम्परायाः महत्त्वविषये ओजस्वि भाषणं प्रस्तुतवती, तथा च शिक्षाशास्त्रविभागस्य छात्रा दृति नायकः स्वकीयेन मधुरेण "गुरुवन्दना" गीतेन सम्पूर्णं सभागारं भावविभोरम् अकरोत्।

## ४. मुख्यव्याख्यानगोष्ठी

मुख्यव्याख्यानसत्रे मुख्यअतिथिः प्रो. क्षिप्रा राय-महोदया स्वकीयोद्बोधने उक्तवती यत् भारतीयसंस्कृतौ गुरुः केवलं ज्ञानदाता एव न, अपितु व्यक्तित्वस्य, संस्कारस्य, चरित्रस्य च निर्माता भवति। सा आधुनिकशिक्षायां भारतीयज्ञानपरम्परायाः गुरुशिष्यपरम्परायाश्च मूल्यानां स्वीकरणस्य आवश्यकतायां विशेषं भरं दत्तवती।
एतदनन्तरं व्याकरणविद्याशाखाध्यक्षः प्रो. उमेशमिश्रः गुरुपूर्णिमायाः ऐतिहासिकं, सांस्कृतिकं, वैदिकं च महत्त्वं विस्तृततया विवेचितवान्।
शिक्षाशास्त्रविद्याशाखाध्यक्षः प्रो. बी.पी.एम. श्रीनिवासः भारतीयज्ञानपरम्परायाः संस्कृतशिक्षायाश्च संरक्षणे गुरोः महतीं भूमिकाम् अधिकृत्य स्वविचारान् प्रकटितवान्।
परिसरस्य सह-निदेशकः प्रो. सुशान्तराजः छात्रान् अनुशासने, समर्पणे, गुरुवचनानां पालने च संलग्नाः भूत्वा उत्कृष्टजीवननिर्माणस्य सन्देशं दत्तवान्।
कार्यक्रमस्य अध्यक्षाः परिसरनिदेशकाश्च प्रो. गुरुचरणसिंहनेगी-महोदयाः स्वकीये अध्यक्षीयोद्बोधने वेद-पौरोहित्य-कर्मकाण्ड-विद्याशाखया आयोजितस्य अस्य उत्कृष्टकार्यक्रमस्य प्रशंसां कुर्वन्तः अकथयन् यत् गुरुशिष्यपरम्परा भारतीयसंस्कृतेः आत्मा अस्ति, अस्याः संरक्षणं प्रतिछात्रं प्रतिशिक्षकं च परमं दायित्वम् वर्तते।

## ५. धन्यवादज्ञापनं समापनं च

कार्यक्रमस्य अन्ते डॉ. शिवसाधनदेवनाथः मुख्यअतिथये, अध्यक्षाय, सर्वेभ्यः आचार्येभ्यः, अधिकारिभ्यः, कर्मचारिभ्यः, छात्रेभ्यः तथा च प्रत्यक्ष-अप्रत्यक्षरूपेण सहयोगं दत्तवद्भ्यः सर्वेभ्यः जनेभ्यः हार्दिकं धन्यवादं व्याहृतवान्।
अन्ते सर्वैः उपस्थितैः जनैः सामूहिकरूपेण राष्ट्रगानं गीतम्। राष्ट्रगानेन सह प्रायः अपराह्णे १२:३० वादने गुरुपूर्णिमामहोत्सवस्य-२०२६ सफलं गरिमापूर्णं च समापनम् अभवत्। कार्यक्रमानन्तरं सर्वेभ्यः अतिथिभ्यः सहभागिभ्यश्च प्रसादस्य अल्पाहारस्य च व्यवस्था कृता आसीत्।

# उत्तराखण्डम्: मुख्यमन्त्री पुष्करसिंहधामी हरिद्वारनगरे कांवड़-तीर्थयात्रिभ्यः पुष्पवृष्टिं कृत्वा स्वागतम् अकरोत्


उत्तराखण्डस्य मुख्यमन्त्री पुष्करसिंहधामी अद्य हरिद्वारनगरे कांवड़-यात्रायाः अवसरे पुष्पाणि विकीर्य तीर्थयात्रिणां स्वागतम् अकरोत्। हरिकीपौड़ीतः कांवड़-यात्रा-गलियारा-मार्गं यावत् हेलिकॉप्टर्-यन्त्रेणापि पुष्पवृष्टिः कृता। मुख्यमन्त्री 'मुख्यमन्त्री-स्वास्थ्यसेवा-शिविरस्य' उद्घाटनम् अकरोत्, तत्र उपलब्ध-चिकित्सासुविधानां निरीक्षणम् अकरोत्, श्रद्धालुभ्यः भोजनं च प्रदत्तवान्।श्रीधामी अवदत् यत् राज्यसर्वकारः देवभूमिं उत्तराखण्डम् आगच्छतः प्रत्येकस्य श्रद्धालुजनस्य कृते सुरक्षितां, सुविधायुक्तां, सम्मानपूर्णां च व्यवस्थां विधातुं कटिबद्धः अस्ति। सः अकथयत् यत् कांवड़-यात्रा भारतस्य सनातनपरम्परायाः, सामाजिकसौहार्दस्य, आध्यात्मिकमूल्यानां च प्रतीकम् अस्ति तथा च अस्याः सुचारुसञ्चालनाय सर्वे सम्बद्धाः विभागाः समन्वयेन कार्यं कुर्वन्तः सन्ति।
मुख्यमन्त्री अवदत् यत् अस्मिन् वर्षे कांवड़-यात्रायाः अवसरे सम्प्रति यावत् दशलक्षाधिकः श्रद्धालुजनः गङ्गाजलं गृहीत्वा स्व-स्व-गन्तव्यं प्रति प्रस्थितवान् अस्ति। सः अवदत् यत् तीर्थयात्रिणां सुरक्षां सुविधां च सुनिश्चितं कर्तुं 'सीसीटीवी'-अवेक्षणम्, 'ड्रोन'-अवेक्षणम्, 'एंबुलेंस'-सेवाः, स्वास्थ्यशिविराणि, आपत्कालीन-प्रतिक्रिया-प्रणाल्यः च समाविष्टाः व्यापिकाः व्यवस्थाः कृताः सन्ति।












# भारतस्य-शिक्षा-प्रणाल्याः यथार्थम्

**प्रातः**काले ६:४५ वादने प्रभारी-प्रधानाध्यापकवर्यः विद्यालयं गन्तुं गृहात् निर्गमनात् पूर्वं यदा चायस्य प्रथमं चुलुकम् एव स्वीकृतवान्, तदैव चलदूरभाषेण (मोबाइल-यन्त्रेण) राष्ट्रनिर्माणस्य शङ्खनादः कृतः। 'व्हाट्सऐप'-समूहे प्रथमः सन्देशः आगतः— **"भवन्तः सर्वे निर्दिष्टाः क्रियन्ते..."।**

गुरुवर्येण विचारितम्, अस्तु, अद्यतनः प्रथमः आदेशः अयम्। विद्यालयप्राप्तिपर्यन्तं द्वितीयः, तृतीयः, चतुर्थः... ततः परं चलदूरभाषः तथैव वाद्यते स्म यथा विद्यालयः न, अपि तु 'शेयर-मार्केट' उद्घाटितम् अस्ति। प्रत्येकस्य सन्देशस्य प्रारम्भः एकः एव, अन्तः अपि प्रायः एकः एव— **"अद्यैव पूर्णं कुर्वन्तु"**, "तत्कालमेव सुनिश्चितं कुर्वन्तु", "दिनद्वये निस्तारणं कुर्वन्तु", "कस्यापि प्रकारस्य शैथिल्यं न वोढव्यम्", "अन्यथा कार्याचरणं प्रस्तावितं करिष्यते"\। केवलं अधो लिखितं नाम परिवर्तते स्म— कदाचित् 'आदेशानुसारं खण्ड-शिक्षा-अधिकारी', कदाचित् 'जिला-शिक्षा-अधिकारी', कदाचित् 'निदेशकः, स्कूली-शिक्षा'।

गुरुवर्येण विचारितम्— अद्य छात्रान् पाठयानि उत राष्ट्रस्य 'डिजिटल'-आत्मानं रक्षयाणि? तदैव प्रथमः आदेशः अवदत्— "अपार-आईडी पूर्णं कुरु"। द्वितीयः अवदत्— "नामाङ्कनस्य अन्तरं समापय"। तृतीयः अक्रोशत्— "द्वि-नामाङ्कनम् अपनय"। चतुर्थः उच्चैः अवदत्— "पीएफएमएस-वयः सत्यापितं कुरु"। पञ्चमः स्मारयति स्म— "एमबीयू दिनद्वये पूर्णं स्यात्"। षष्ठः अवदत्— "यू-डायस ड्रॉप-बॉक्स-स्थान् छात्रान् 'इम्पोर्ट' कारय"। सप्तमः अगर्जत्— "निपुण-प्लस अपडेट् कुरु"। अष्टमः स्मितं कृत्वा अवदत्— "समग्र-प्रगति-पत्रं पुस्तकालयस्य पुस्तकानि च बीआरसी-कार्यालयतः आनेतुं मा विस्मरतु"।

एतावति अन्तरे खण्डतः (ब्लॉकतः) सन्देशः आगतः— "अद्य ११:३० वादने 'राष्ट्रीय कृमि मुक्ति दिवस'-विषये जालीय-उपवेशनं (ऑनलाइन-बैठकम्) अनिवार्यम् अस्ति"। गुरुवर्येण घटिका दृष्टा। तस्मिन्नेव समय एएनएम-स्वास्थ्यकर्मचारी टीकाकरणाय आगमिष्यति स्म। इतः पाचक-स्त्री (रसोइया) पृच्छति स्म— "अद्य कियद्भ्यः छात्रेभ्यः फलानि दातव्यानि?" तदैव द्वितीयः सन्देशः— "फल-लाभार्थीनां 'हार्ड-कॉपी' बीआरसी-कार्यालये समर्पयन्तु"। तदैव तृतीयः— "पाचकानां उपस्थितिम् अपि सहैव प्रेषयन्तु"।

छात्राः तावत् प्रार्थनायाः अनन्तरं स्व-स्व-कक्षासु प्राप्ताः आसन्। एकः बालकः अवदत्— "गुरुवर्य! अद्य गणितं पाठयिष्यति किम्?" गुरुवर्यः चलदूरभाषं दृष्ट्वा अति-स्नेहेन अवदत्— "वत्स! अद्य यदि समयः अवशिष्टः भवेत् तर्हि अवश्यं पाठयिष्ये। पूर्वं राष्ट्राय एतत् निवेदयामि यत् त्वं कस्यां कक्षायाम् असि, कस्मिन् 'पोर्टल'-मध्ये असि, कस्मिन् 'ऐप'-मध्ये असि, कस्यां सूच्याम् असि, कस्मिन् 'ड्रॉप-बॉक्स'-मध्ये असि, कस्मिन् आधार-संख्यायाम् (Aadhaar) बद्धः असि, कस्मिन् च वित्तकोश-खाते (Bank Account) तव भविष्यत् सुरक्षितम् अस्ति।"

तदैव एकः नवीनः आदेशः आगतः— "पाक-वाटिकायाः (किचन गार्डन) चित्रं प्रेषयन्तु"। चित्रं प्रेषयन् स्मारितम् यत् 'सोख्ता-गर्तस्य' तथा 'रेन-वाटर-हार्वेस्टिंग-यूनिट'-स्य जीपीएस-चित्रम् अपि आवश्यकम्। इतः केनचित् स्मारितम्— "अस्माकं खण्डः 'नवोदय'-पत्रपूरणे पश्चात् वर्तते, प्रत्येकं विद्यालयः न्यूनतिन्यूनं द्वे पत्रे पूरयेत् तर्हि अस्माकं खण्डः प्रथमः भवेत्"। सम्प्रति गुरुवर्यः विचारयितुं लब्धवान् यत् सः शिक्षकः अस्ति, 'डेटा-एंट्री-ऑपरेटर' अस्ति, सर्वेक्षकः अस्ति, 'बैंक-मित्रम्' अस्ति, आधार-केन्द्रम् अस्ति, 'पोर्टल'-विशेषज्ञः अस्ति, छायाचित्रकारः अस्ति, सामाजिक-मीडिया-प्रबन्धकः अस्ति, स्वास्थ्य-संयोजकः अस्ति, पर्यावरण-अभियन्ता अस्ति उत वा मध्ये-मध्ये छात्रान् पाठयेत् अपि!

अपराह्णे एकः नवीनः सन्देशः आगतः— "निपुण-लक्ष्यस्य 'कैच-अप'-सूचकाः (पोस्टर) अद्यैव आरोप्यन्ताम्, चित्रं जनपदाय प्रेष्यताम्"। गुरुवर्येण साहसं कृत्वा पृष्टम्— "श्रीमन्! सूचकारोपणानन्तरं छात्रान् अपि पाठयानि किम्?" उत्तरं तु न आगतम्, किन्तु पञ्चमिनिटानन्तरं अपरः आदेशः आगतः— "कार्ये शैथिल्ये प्राप्ते सम्बद्धः प्रधानाध्यापकः एव उत्तरदायी भविष्यति"।

सायङ्काले गृहं प्रतिनिवर्तने पत्न्या पृष्टम्— **"अद्य विद्यालयों किं पाठितम्?"** गुरुवर्यः किञ्चित् कालं यावत् तूष्णीम् आसीत्। ततः अवदत्— "अद्य मया छात्रैः न, अपि तु 'पोर्टल'-समूहैः सन्तोषः प्राप्तः। अद्य मया शिक्षा न्यूना, प्रमाणानि अधिकानि दत्तानि। अद्य मया एतत् सिद्धं कृतं यत् अस्माकं विद्यालयः जीवितः अस्ति, छात्राः जीविताः सन्ति, पाचिका जीविता अस्ति, पाक-वाटिका जीविता अस्ति, सोख्ता-गर्तः जीवितः अस्ति, सूचकाः जीविताः सन्ति, 'ऐप'-जीवितम् अस्ति, 'पोर्टल'-जीवितम् अस्ति... केवलं एतत् ज्ञातुं न शक्यत यत् कक्षायां पाठः कियत् जीवितः आसीत्।"

रात्रौ शयनात् पूर्वं तेन चलदूरभाषः निःशब्दः (silent) कृतः एव आसीत् यत् अन्तिमः सन्देशः प्रकाशितः— **"सर्वे प्रधानाध्यापकाः ध्यानं ददतु, एतत् अत्यन्तम् आवश्यकम् सर्वोच्च-प्राथमिकतायाः च कार्यम् अस्ति। तत्कालम् अनुपालनं सुनिश्चितं कुर्वन्तु"।**

गुरुवर्यः अस्मयत्। तेन अवगतं यत् बेसिक-शिक्षायां सम्प्रति 'प्राथमिकतायाः' अपि पदोन्नतिः अभवत्। अत्र सर्वमपि कार्यं "सर्वोच्च-प्राथमिकता" अस्ति, केवलं शिक्षणं विहाय। अवशिष्टानाम् सर्वेषाम् आदेशानां अधः पृथक्-पृथक् हस्ताक्षराणि भवन्ति, किन्तु तेषां सारः एकः एव भवति, एतेषां सर्वेषां मध्ये क्वचित् अति-लघुः, अति-मौनः, अति-उपेक्षितः च पात्रः उपविष्टः भवति— **"कक्षायां शिक्षकस्य प्रतीक्षां कुर्वाणः बालकः"**- **हिमसंस्कृतवार्ता**

# वन्दे संस्कृतमातरम्

## लौकिकन्यायकोशः

## अयस्कान्त (सूचि) न्यायः

अयस्कान्तमणिर्नाम लौहचुम्बकः मणिः। एषः मणि स्वस्थाने एव भूत्वा अयसः शकलान् आकर्षति। सः स्वयं किमपि न करोति।

सांख्यदर्शनानुसारं पुरुषतत्त्वं निष्क्रियं भवति। तत् स्वसमीपे वर्तमानायाः प्रकृतिद्वारा जगत्- निर्माणम् इत्यादिकं करोति। यः स्वतः निष्क्रियः भूत्वा अन्यैः कार्याणि संपादयति तादृशस्य पुरुषस्य कृते अस्य न्यायस्य प्रयोगः क्रियते। यथा अयस्कान्तवद् रूपादिवच्च प्रवृत्तिरहितादपि प्रवर्तको भवति।

(ब्रह्मसूत्रशाङ्करभाष्यं २-१-२२ )।

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे, महाराष्ट्रम्**



# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अतीव विचित्राः वार्ताः श्रुताः मया। एका नूतना कीटानां जातिः वैज्ञानिकैः अन्विष्टा। तस्य कीटस्य अङ्गानि अतीव आयतानि सन्ति, अतः कस्यचित् चित्रकथा-नायकस्य नाम तस्मै कीटाय दत्तम्।

**नन्दिनी-** अहो! कीटेन अपि नायकस्य नाम प्राप्तम् इति महदाश्चर्यम्!

अन्या काचित् वार्ता अपि अस्ति, मङ्गल-ग्रहस्य वातावरणे महा-तरङ्गाः दृष्टाः। सौर-वातेन तत्र समुद्रे इव तरङ्गाः उत्पादिताः।

**काव्या-** मङ्गल-ग्रहे तरङ्गाः! अन्तरिक्षस्य रहस्यं न केनापि ज्ञातम्। किन्तु भूमावपि एका विचित्रा वात्या आगतवती अस्ति। तया वात्यया स्वस्य एव मार्गे चक्राकारः निर्मितः। वायु-वैज्ञानिकाः अपि तद्दृष्ट्वा चकिताः जाताः।

**नन्दिनी-** वात्या अपि उन्मत्ता जाता इति हास्यकरम्। परन्तु मया एका भयानका वार्ता पठिता। आपत्-काले साहाय्यार्थम् एकं नूतनं यन्त्रं निर्मितम्। तस्य यन्त्रस्य शिरः अजस्य शिरः इव भयानकं निर्मितम्। यदि तद् यन्त्रं दृष्टं भवेत्, तर्हि तत् कथं नाशनीयम् इत्यपि निर्देश-पुस्तिकायां लिखितम्।

**काव्या-** अहो! यन्त्रस्य विनाश-विधिः पूर्वमेव चिन्तितः इति सम्यक्। अद्यतनीनां विचित्राणां वार्तानां सङ्ग्रहः अतीव रोचकः जातः।

# परमपूज्याचार्याणां श्रीबालकृष्ण महाभागानां जन्मदिवसावसरे जडी-बूटी-दिवसस्य आयोजनम्




**हिमसंस्कृतवार्ता।** गतमंगलवासरे २०२६ ख्रिस्ताब्दे:, अगस्तमासस्य चतुर्थ्यां तिथौ परमपूज्याचार्याणां श्रीबालकृष्ण महाभागानांजन्मदिवसस्य पुनीतावसरं निमित्तीकृत्य हरियाणा-पतञ्जलि-योग-समित्या महेन्द्रगढजनपदे ओषधीयवनस्पतिपादपारोपणेन "जडी-बूटी-दिवसः" इति कार्यक्रमः समायोजितः प्रकृतिसंरक्षणाय संदेशश्च प्रसारित।समारोहेऽस्मिन् मुख्यातिथिरूपेण हरियाणा-केन्द्रीय-विश्वविद्यालयस्य स्वामी दयानन्द सरस्वती-पीठस्य पीठाध्यक्षा डॉ. सुमन रानी महोदया कार्यक्रममेनमलंकृतवती। स्वीये प्रेरणादायके उद्बोधने डॉ. सुमन रानी उक्तवती यत् "प्रकृतिसंरक्षणमेव मानवकल्याणाय मूलमिति"। सा अवोचत् यत् वैदिकसंस्कृतौ प्रकृतिः माता इव पूज्या इति मन्यते। स्तनन्धयस्य बालकस्य कृते यथा जननी जीवनाय आधारभूता तथैव वनस्पतयः, वृक्षाः, नद्यः, पर्वताः जन्मभूमिश्चापि न केवलमस्मभ्यपितु समेषामपि प्राणीनां कृते जीवनदायिन्यः इति। पर्यावरणस्य संरक्षणं, औषधीयवनस्पतीनां संवर्धनं जैवविविधतायाः परिपालनमेव स्वस्थसमृद्धस्य समाजस्य मूलमिति। तया आह्वानं कृतं यत् सर्वैरपि नागरिकैः स्व-स्वजीवनकाले न्यूनातिन्यूनम् एकं वृक्षं वा औषधीयवनस्पतिं वा रोपयित्वा तस्य संरक्षणदायित्वं निर्वोढव्यमिति। कार्यक्रमे तुलसी-घृतकुमारी- अश्वगन्ध-गिलोयादीनाम् औषधीयवनस्पतीनां स्वास्थ्यरक्षणे पर्यावरणसंवर्धने च महत्त्वं विस्तरेण प्रतिपादितम्। कार्यक्रमस्य समापनावसरे महेन्द्रगढनगरे, हुडा-उपवने (पार्कमध्ये इति) सर्वैर्मिलित्वा वृक्षारोपणकार्यक्रमः सम्पन्नः। अस्मिन् कार्यक्रमे हरियाणा-पतञ्जलि-योग-समितेः पूर्वाध्यक्षा रीना-बण्टी-भगिनी, सुनील-भगिनी, उमा-भगिनी, सुनीता-भगिनी अन्ये च समितेः गणमान्यसदस्याः उत्साहपूर्वकम् उपस्थिताः अभवन्। सर्वैरपि प्रकृतिसंरक्षणाय, औषधीयवनस्पतीनां संवर्धनाय च संयुक्तरूपेण कार्यं कर्तुं दृढः संकल्पः व्यक्तीकृतः। अन्ते च आयोजकैः समेषामपि उपस्थितानां धन्यवादपुरस्सरम् आयोजनस्यास्य सम्पन्नता समुद्घोषिता।

# लघुकथा



हिमसंस्कृतवार्ता
असमप्रदेशीयः
विज्ञानशिक्षकः, नारदोपाध्यायः



**"शूरोऽसि कृतविद्योऽसि दर्शनीयोऽसि पुत्रक।**
**यस्मिन् कुले त्वमुत्पन्नो गजस्तत्र न हन्यते॥"**

श्लोकोऽयं पञ्चतन्त्रकथातोऽस्ति। कथानुसारम्, एकस्मिन् वने सिंहदम्पती निवसतः स्म। तयोः द्वौ पुत्रौ आस्ताम्। सिंहस्य दैनिकं कार्यं यत् स मृगान् हत्वा मांसखादनाय तत्परिवाराय ददाति स्म, एवं प्रतिदिनं स पत्नीपुत्राणां पालनपोषणादिकम् अकरोत्। एकदा स आखेटसमये एकं शृगालशिशुम् अवलोक्य करुणावशतः, तम् अहत्वा एव आनीय तत्पत्न्यै दत्तवान्। सा सिंहपत्नी अपि तं हन्तुं न ऐच्छत्, अपितु वात्सल्येन तं स्वपुत्रवत् पालितवती। सा स्वपुत्रौ यथा पालीतवती, तथैव तमपि समानतया रक्षितवती। ताभ्यां यथा मांसाहारादिकं ददाति स्म, तथैव शृगालशिशवे अपि अददात्। एवं ते त्रयः परस्परं भेदम् अजानन्त एव प्रवृद्धाः। यथाकालं ते वनमध्ये अटितुमपि आरब्धवन्तः। एकदा अटनसमये एको गजः तेषां पुरतः उपस्थितोऽभवत्। तं गजं दृष्ट्वा सिंहपुत्रौ सहसा तस्य आक्रमणार्थं सिद्धौ जातौ। परन्तु शृगालपुत्रः गजं कुलशत्रुं मन्वानः स, तयोः आक्रमणं निवारयन्, गजभयात् च गृहं प्रति पलायनं कृतवान्। तस्य पलायनं दृष्ट्वा सिंहपुत्रौ अपि ततो गृहं प्रत्यागतवन्तौ। गृहं प्राप्य तौ गजभीत्या भ्रातुः पलायनवार्तां पितरं श्रावितवन्तौ। तत् श्रुत्वा सिंहः कुपितो जातः। 'सिंहकुलस्य अपमानोऽयम्' इत्युक्त्वा स पुत्रौ निन्दितवान्। तदनन्तरं सिंही तं शृगालपुत्रम् एकान्ते आनीय उक्तवती- "भो, वत्स! भवान् पुनः कदापि भवद्भ्रात्रोः उत्साहभङ्गं मा करोतु" इति। स शृगालपुत्रोऽपि सरोषम् उक्तवान्- "अम्ब! अहं शौर्यरूपादिभिः ताभ्यां हीनः किम्, तौ माम् एवं किमर्थम् उपहसतः?" इति। तस्य एतद्वचनं विश्रुत्य स्मितवदना सा उपरितनं श्लोकम् उक्तवती आसीत्। "भवान् शौर्यविद्यासुन्दरादिभिः न तयोः न्यूनः। परन्तु वत्स! त्वं शृगालपुत्रः असि। अहं दयावशतः त्वां पुत्रमिव पालितवती अस्मि। त्वं शृगालपुत्रः इति यदि मत्पुत्रौ जानीतः तर्हि त्वां मारयिष्यत एव। तस्मात् ततः पूर्वमेव त्वम् इतो गत्वा स्वजातीयशृगालैः सह वासं कुरु" इति। कथायाः तात्पर्यं यत् जातिस्वभावो न कदापि परिवर्तते इति।

# "भारते दत्तांशोद्भवात् पारिस्थितिकी तंत्रोत्पादनम्"



**रविः खरिडेहालः - बेङ्गलुरु**

भारते 'डाटा' (दत्तांश) क्षेत्रे तीव्रगत्या वर्धते। यत्र डाटा सुरक्षितः क्रियते, तत्रैव 'डाटा सर्वर' (दत्तांशवितरणयन्त्रम्) कार्यं करोति। एतादृशाः सर्वराः 'डाटा सेन्टर' (दत्तांशकेन्द्रम्) मध्ये भवन्ति। आधुनिक-तकनीकी-क्षेत्रे (पारिस्थितिकीतन्त्रे) एतेषां सर्वराणां तथा डिजिटल-व्यवस्थायाः महती भूमिका अस्ति।

## मुख्यबिन्दवः प्रभावाः च

**पूर्णक्षमताः**

२०३० तमवर्षपर्यन्तं भारतस्य अङ्कीय-क्षेत्रे (डिजिटल-क्षेत्रे) आहत्य ९,०३० मेगावाट् (MW) विद्युत-ऊर्जायाः आवश्यकता भविष्यति।

**उद्योगावसराः**

अनेन क्षेत्रेण प्रत्यक्ष-परोक्ष-रूपेण प्रायः ४.३३ लक्षं (4,33,000) जनाः वृत्यवसरं प्राप्स्यन्ति।

**स्थानस्य आवश्यकता**

डाटा-केन्द्राणां कृते १९५० लक्षं वर्गफीट् (195 Million Sq. Ft.) तः अधिकायाः भूम्याः/भवनस्य आवश्यकता भविष्यति।


**मुख्यकारानि**

कृत्रिमबुद्धिः (AI), क्लाउड-कम्प्यूटिङ्ग्, तथा उद्योगेषु डिजिटलीकरणम् (अङ्कीकरणम्) एतस्य तीव्रविकासस्य मुख्यकारानि सन्ति।

अन्येषु क्षेत्रेषु लाभः (सहायकवृद्धिः): अनेन स्थानीय-विद्युत-व्यवस्थायां, फाइबर-ऑप्टिक-जाले (Internet Cable), रसद-क्षेत्रे (Logistics), निर्माण-कार्येषु (Construction) च विशाल-निवेशः भविष्यति।




# बाल-प्रहेलिकाः



**प्रहेलिका:**

**अपदो दूरगामी च साक्षरो न च पण्डितः।**
**अमुखः स्फुटवक्ता च यो जानाति स पण्डितः॥**

सरलार्थः: यस्य पादौ न स्तः, किन्तु दूरं गच्छति। यः साक्षरः (अक्षरयुक्तः) अस्ति, किन्तु पण्डितः न अस्ति। यस्य मुखं न अस्ति, तथापि स्पष्टं वदति। यः एतत् जानाति, सः एव पण्डितः।

**उत्तरम्:** पत्रम् (चिट्ठी / Letter)

**वृक्षाग्रवासी न च पक्षीराजः, त्रिनेत्रधारी न च शूलपाणिः। त्वग्वस्त्रधारी न च सिद्धयोगी, जलं च बिभ्रन् घटो न मेघः॥**

सरलार्थः: यः वृक्षस्य अग्रे वसति किन्तु गरुडः न अस्ति। यस्य त्रीणि नेत्राणि सन्ति किन्तु शिवः न अस्ति। यः छाल-वस्त्र धरति किन्तु संन्यासी न अस्ति। यस्मिन् जलं पूर्णम् अस्ति किन्तु घटः मेघः वा न अस्ति।

**उत्तरम्:** नारिकेलम् (नारियल / Coconut)

**एकचक्षुर्न काकोऽयं, बिलमिच्छन्न पन्नगः।**
**क्षीयते वर्धते चैव, न समुद्रो न चन्द्रमाः॥**

सरलार्थः: यस्य एकं नेत्रम् (छिद्रम्) अस्ति किन्तु काकः न अस्ति। यः बिलं (छिद्रं) प्रविशति किन्तु सर्पः न अस्ति। यः घटते वर्धते च, किन्तु समुद्रः चन्द्रमा वा न अस्ति।

**उत्तरम्:** सूचिका (सुई / Needle)